श्रीवह्राडपाण्डेमहाभागानां दार्शनिककार्यस्य विश्लेषणात्मकमध्ययनम्।

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य दर्शनविभागस्य विद्यावारिधिपदव्याः शोधकार्यस्य शोधसंक्षिप्तिकासमर्पणम्।

शोधकर्ता

परीक्षित् नन्दकिशोरः झोडेकरः

मार्गदर्शकाः

डॉ. पेन्नामधुसूदनः

अधिष्ठाता, भारतीयदर्शनविभागः

भारतीयधर्मतत्त्वज्ञानसंस्कृतिसंकायः

कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः, रामटेकम् (महाराष्ट्रम्)

२०२० – २०२१

प्रास्ताविकम्

अद्यतनविज्ञानयुगे प्रत्यहं नूतनानि अनुसन्धानानि भवन्ति। एकः महान् वैदर्भीयः तत्त्वविद् परवर्तिविज्ञानविदां ज्ञानं भारतीयदर्शनस्य परिधौ संस्थाप्य उत्कृष्टतया स्वप्रतिभया समाजमभितः प्रास्तौत्।

विदर्भप्रान्ते समभवन् महान्तः तत्त्वज्ञानिनः श्रीमन्तः वह्लाडपाण्डेमहाभागाः। तेषां जीवनं मेधाप्रज्ञाविनयादीनां तथैव स्वकार्यं प्रति समर्पणमित्यादीनाञ्च अद्भूतगुणानां स्रोतोरूपमेव। प्रदीर्घकालादारभ्य दार्शनिकानां या परम्परा प्रसिद्धा तस्यां परम्परायां स्वस्थानं विभूषितवन्तः दार्शनिकाः श्रीमन्तः वह्लाडपाण्डेमहाभागाः।

श्रीवह्लाडपाण्डेमहाभागाः सत्यवादप्रवर्तकाः। ते बर्ट्रण्डरस्सेलमहोदयस्य तत्त्वज्ञानविचारेण अधिकं प्रभाविताः अभवन्। तेषां मनसि बर्ट्रण्डरस्सेलमहोदयेन सह मेलनस्य इच्छा जाता। सा च इच्छा ऑक्सफोर्डविश्वविद्यालये पूर्णा अभवत्। बर्ट्रण्डरस्सेलमहदयेन साकं तैः नैकेषु विषयेषु चर्चा कृता। वह्लाडपाण्डेमहाभागैः बर्ट्रण्डरस्सेलमहोदयेन सह न्यायः, भाषा इत्यादिषु विषयेषु गभीरं कार्यं कृतम्।

श्रीमतां वह्लाडपाण्डेमहाभागानां कार्यस्य ग्रन्थसम्पदश्च ज्ञानं भाविसमाजेषु भवेदिति धिया मया अयं विषयः चितः।

प्रस्तुतः प्रबन्धः पञ्चप्रकरणेषु विभाजितः वर्तते।

तेषु प्रथमप्रकरणे

वह्लाडपाण्डेमहाभागानां सामान्यपरिचयः तथा जन्माध्ययनादीनां विवरणं तेषां कृतीनाञ्च परिचयः प्रदास्यते।

द्वितीयप्रकरणे

भारतीयदर्शनशास्त्रेषुसमस्याः, वह्लाडपाण्डेमहाभागैः रचितेषु नैकेषु ग्रन्थेषु दार्शनिक विचाराः, तेषां योगदानमित्यादीनां विषयाणां चिन्तनं करिष्यते।

तृतीयप्रकरणे

श्रीवह्लाडपाण्डेमहाभागानां शोधकार्यस्य "कालःदिग्गतिश्च" (Time, Space And Motion) इत्यस्य विषयस्य परिचयः अध्ययनञ्च । तत्राऽपि वैशिष्ट्यपूर्णमिदं यत् श्रीवह्लाडपाण्डेमहाभागैः 'कालदिग्गतिः' इति जीवनं गतिः भविष्यकथनञ्च एतैः सह सम्बध्यते इति तेषां ग्रन्थानामभ्यासः तृतीयप्रकरणे दास्यते।

चतुर्थप्रकरणे

पक्षता, व्याप्तिः इत्यादयः सङ्कल्पनाः बीजगणितं निकषा वर्तन्ते ताः नव्यन्यायानुसारं श्रीवह्लाडपाण्डेमहाभागैः संस्थापिताः तासामपि प्रस्तुतिः अस्मिन् प्रदर्शयिष्यते।

पञ्चमप्रकरणे

श्रीवह्लाडपाण्डेमहाभागानाम् उपलब्धायाः प्रकाशिताप्रकाशितग्रन्थसम्पदः आधारेण तेषां दार्शनिकयोगदानस्य परिशीलनं भविष्यति। प्रबन्धान्ते समेषां प्रकरणानां सारांशः उपसंहारश्च प्रख्यापयिष्यते।

एतादृशेषु पञ्चसु अध्यायेषु चिन्तनं प्रदर्श्यते। तेषु गतिकालस्थानानां सम्बन्धः तत्त्वज्ञानेन संयोज्य नूतनविचारं श्रीवह्लाडपाण्डेमहाभागाः प्रास्तुवन्। तथा चात्र झेनो-अरस्तु-इत्यादीनां तत्त्वविदां मतानां विचाराः स्वीकृताः। एवं रीत्या श्रीवह्लाडपाण्डेमहभागानां दार्शनिककार्यं चिन्तनं च मया प्रदर्शयिष्यते इति लघ्वायासः।

समस्याकथनमावश्यकता च -

जनानां कालदिग्गतीनां तथा च 'नव्यन्यायानुसारं बीजगणितस्य' च विषये तत्त्वज्ञानं न विद्यते। तस्मात् श्रीवह्हाडपाण्डेमहाभागानां नूतनविचारशैलीं जनानां पुरतः प्रस्तोतुम् अस्य संशोधनस्य आवश्यकता विद्यते।

संशोधनस्य उद्देशः अपेक्षा च–

१) मूलभारतीयदर्शनं नूतनतत्त्वज्ञानं च इत्यनयोः संयोजनेन समाजेषु तत्त्वज्ञानं प्रति रुचिः ज्ञानं च वर्धेयाताम्। इति अस्य संशोधनकार्यस्य मुख्योद्देशः अपेक्षा च।

२) श्रीवह्हाडपाण्डेमहाभागानां भौतिकशास्त्रविषयकं भारतीयदर्शनशास्त्रविषयकं ज्ञानं तेषां दार्शनिकसाहित्यस्य च ज्ञानं समाजेषु प्रसिद्धिं लभेत।

३) तेषां दार्शनिकज्ञानम् आधुनिककालेऽपि महत्त्वपूर्णमेव उपयुक्तं च भवति इति समाजमभितः स्थापनीयमिति अस्य संशोधनस्य उद्देशः।

सम्बन्धितपूर्वसंशोधनसाहित्यपरामर्शः –

अस्मिन् विषये सम्बन्धितं पूर्वसंशोधनसाहित्यं मया न प्राप्तम्। किन्तु राष्ट्रसन्ततुकडोजीमहाराजनागपुरविद्यापीठस्य वाघमारेप्रगती इत्यस्याः 'डॉ. नी. र. वऱ्हाडपांडे यांचे संस्कृत साहित्य व संशोधन यांना योगदान' इति शोधप्रबन्धः अस्ति तथा च कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य विशिष्टाचार्यस्य (M. Phil)

शोधच्छात्रा सातमोहनकरवैशाली इत्यस्याः 'डॉ. श्री नी. र. वऱ्हाडपांडे यांचे जीवन, कृती व दार्शनिक चिंतन' इत्यस्मिन् विशिष्टाचार्यस्य (M. Phil) लघुशोधप्रबन्धः अस्ति। द्वयोः शोधप्रबन्धयोः श्रीवह्राडपाण्डेमहाभागानां केवलं जीवनचरित्रस्य साहित्यिककृतीनाञ्च अध्ययनं तथा संशोधनक्षेत्रे योगदानम् इत्यस्यैव विचारः कृतः। मया अनेन सह श्रीवह्राडपाण्डेमहाभागानां "Time Space And Motion "इति ग्रन्थे प्रतिपादितानां विषयाणां तथा तैः प्रतिपादिताः नव्यन्याये बीजगणितीयविचाराणाम् अस्मिन्संशोधनकार्ये दार्शनिकदृष्ट्या विश्लेषणात्मकम् अध्ययनं कर्तव्यं वर्तते। अतः मम संशोधनस्य व्याप्तिः ततः अधिका विद्यते।

शोधपरिकल्पना –

भारतीयदर्शनशास्त्रानुसारं श्रीवह्राडपाण्डेमहाभागानां महत्त्वपूर्णं योगदानम् एवं परवर्तिवैज्ञानिकानां भौतिकशास्त्रबीजगणिततत्त्वज्ञानानि इति विषये समन्वयात्मकाध्ययनम् इति संशोध्यः विषयः। वह्राडपाण्डेमहाभागैः कृतस्य कार्यस्य परिचयदृष्ट्या दिक्कालगतयः इत्येषां विषये तैः तार्किकरीत्या कृतं विश्लेषणात्मकचिन्तनम् एवं नव्यन्यायानुसारं बीजगणितम् इति विषयद्वयस्य समाजाभिमुखीकरणम्, आधुनिककाले तस्य महत्त्वस्य उपयोगितायाः ज्ञापनम् इति अस्य शोधस्य परिकल्पना।

शोधपद्धतिः –

अस्यसंशोधनस्य पद्धतिः विश्लेषणात्मिका भविष्यति। माध्यमं च संस्कृतं भविष्यति।

प्राक्कल्पना –

सम्पूर्णप्रबन्धस्य विषयविचारेण एतदेव ज्ञायते यत् श्रीमतां वह्लाडपाण्डेमहाभागानां बृहत्साहित्यसम्पद् नूतनशैल्या रचिता। तेषां समग्रस्य साहित्यस्य अध्ययनेन विविधाः नूतनविषयाः उपलभ्यन्ते येषां नूतनतया विचारः कर्तुं शक्यते। एतादृशेन विषयज्ञानं भाविसमाजस्य उपयोगाय भविष्यति तथा च नवीनदृष्ट्या विचारिताः विषयाः नवीनतमं कार्यं कर्तुं छात्राणां मार्गदर्शनाय प्रेरणाय च भविष्यति इति विश्वासः।

व्याप्तिः मर्यादा च –

श्रीवह्लाडपाण्डेमहाभागानां जन्माध्ययनसाहित्यकृतिपरिचयपुरस्सरं भौतिकशास्त्रबीजगणितदर्शनादिषु प्रदर्शितस्य चिन्तनस्य परिशीलनमेव अस्य विषयस्य व्याप्तिः।

श्रीवह्लाडपाण्डेमहाभागानां साहित्येतिहासदर्शनशास्त्रादिषु गभीरं चिन्तनं वर्तते। अस्मिन् शोधप्रबन्धे केवलं तेषां दार्शनिकमतानां योगदानस्य च परिशीलनं क्रियते इयमेव अस्य शोधकार्यस्य मर्यादा।

शोधकालावधिः –

वर्षत्रयमिति अस्य संशोधनकार्यस्य कालमर्यादा।

प्रकरणविभजनम् –

प्रकरणम्	शीर्षकम्	विवरणम्
प्रस्तावना		
प्रथमप्रकरणम्	श्रीवह्लाडपाण्डेमहाभागानां परिचयः अ)जन्म आ)शिक्षा इ)रचनाः	श्रीवह्लाडपाण्डेमहाभागानां सामान्यपरिचयः, तेषामध्ययनं तथा तेषां ग्रन्थसम्पदां विषये विवरणमत्र करिष्यते।
द्वितीयप्रकरणम्	भारतीयदर्शनगताः समस्यात्मकसङ्कल्पनाः – व्याप्तिः, पक्षधर्मता, पक्षता, परामर्श इत्यादयः।	भारतीयदर्शने प्रमाणचर्चा विशेषमहत्त्वां विदधाति। तत्राऽपि अनुमानप्रमाणस्य विस्तृतचर्चा भवति। विभिन्नैः दार्शनिकैःअनुमानस्य प्रामाण्यं सेद्धुम् आदौ अनुमितिकरणस्य व्याप्तेः तज्ज्ञानस्य तत्सहकारिकारणानां परामर्शादीनाञ्च प्रामण्यं साधनीयं भवति। अतः विभिन्नदार्शनिकसम्प्रदायानां विशेषतः बौद्धनैयायिकानां सविस्तरचर्चा दरीदृश्यते। तासां व्याप्त्यादिनां समस्यात्मकसङ्कल्पनानाम् एवं तद्विषये वह्लाडपाण्डेमहाभागानां चिन्तनस्य विवरणमत्र भविष्यति।
तृतीयप्रकरणम्	कालः दिक् एवं गतिः इत्येतेषां विषये वह्लाडपाण्डेमहाभागानां चिन्तनम्।	श्रीवह्लाडपाण्डेमहाभागैः तेषां दार्शनिककृतौ पाश्चात्त्यदार्शनिकानां मतप्रदर्शनपुरःसरं तार्किकपद्धत्या दिक्कालगतीनां स्वचिन्तनं प्रदर्शितं तेषां मतानां परिशीलनमत्र दास्यते।
चतुर्थप्रकरणम्	नव्यन्यायगतं बीजगणितीयचिन्तनम् –	नव्यन्यायदर्शने अनुमानप्रमाणनिरुपणप्रसङ्गे

	श्रीवह्लाडपाण्डेमहाभागानां चिन्तनम्।	विभिन्नबीजगणितीयप्रक्रियाणाम् उपयोगः भवतीति श्रीवह्लाडपाण्डेमहाभागानां चिन्तनस्य परिशीलनमत्र प्रख्यापयिष्यते।
पञ्चमप्रकरणम्	श्रीवह्लाडपाण्डेमहाभागानां दार्शनिकं योगदानम्।	श्रीवह्लाडपाण्डेमहाभागानाम् उपलब्धायाः प्रकाशिताप्रकाशितग्रन्थसम्पदः आधारेण तेषां दार्शनिकयोगदानस्य विवरणमत्र प्रदर्श्ययिष्यते।
उपसंहारः		समेषां प्रकरणानाम् एवं श्रीवह्लाडपाण्डेमहाभागानां दार्शनिकचिन्तनस्य सारः एवं भाव्यनुसन्धानावसराः उपसंहाररूपेणात्र दर्शयिष्यते।

सन्दर्भग्रन्थसूची –

संस्कृतग्रन्थाः

ग्रन्थकारः	ग्रन्थः	प्रकाशनम्	दिनाङ्कः
उमाशंकरः शर्मा ऋषिः	सर्वदर्शनसङ्ग्रह	चौखम्बा संस्कृत संस्थान, वाराणसी	२०१६
गङ्गेशोपाध्यायः	पदार्थतत्त्वचिन्तामणि	मोतीलाल बनारसीदास, दिल्ली	१८९७; पुनर्मुद्रित १९७४
गदाधरभट्टाचार्यः	गादाधरी	जयकृष्णदास-हरिदासगुप्तः चौखम्बासंस्कृतसीरीज आफ़िस, विद्याविलास प्रेस, बनारस	१९८३
दयानन्दःभार्गवः	तर्कसङ्ग्रहः	मोतीलाल बनारसीदास, दिल्ली	२००१

नी. र. वह्राडपाण्डे	कूजनम्	सचिन स. उपाध्याय, विजय प्रकाशन,नागपुर	१४ जानेवारी २००७
बदरीनाथशुक्ल	माथुरीपञ्चलक्षणी	राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर	१९८४
विश्वनाथभट्टाचार्यः	न्यायसिद्धान्तमुक्तावली	चौखम्बा सुरभारती प्रकाशन, वाराणसी	२०१४
सोमनाथः उपाध्यायः	जागदीशीटीका	चौखम्बासंस्कृतसीरीज, बनारस	१९०७

मराठीग्रन्थाः

ग्रन्थकारः	ग्रन्थः	प्रकाशनम्	दिनाङ्कः
नी. र. वऱ्हाडपांडे	कपोलकल्पित आर्य आणि त्यांच्या स्वाऱ्या	लाखे प्रकाशन, नागपुर	द्वितीय आवृत्ती २८ मे २००९
नी. र. वऱ्हाडपांडे	भम्पकराव बाताडे आणि इतर गोष्टी	सुरम्य ३८, हिंदुस्तान कॉलनी, नागपूर	१९८६
नी. र. वऱ्हाडपांडे	वाणी आणि वाङ्मय	स्वाती प्रकाशन, पुणे	१४ जानेवारी २००७
नी. र. वऱ्हाडपांडे	विवेकवाद	विजय प्रकाशन	२ री आवृत्ती, ५ जुलै २००१

हिन्दीग्रन्थः

ग्रन्थकारः	ग्रन्थः	प्रकाशनम्	दिनाङ्कः
बलदेव उपाध्याय	भारतीय दर्शन	चौखम्बा ओरियन्टालिया, वाराणसी	१९७६

आङ्ग्ग्रन्थः

ग्रन्थकारः	ग्रन्थः	प्रकाशनम्	दिनाङ्कः
DR. N. R. WARHADPANDE	TIME, SPACE AND MOTION	NAGPUR VIDYAPEETH MUDRANALAYA, NAGPUR	१९६९

अन्तर्जालीयसन्दर्भाः –

१) झेनो–परिचयः - https://plato.stanford.edu/entries/zeno-elea/

२) अरस्तू-परिचयः - https://plato.stanford.edu/entries/aristotle

३) बर्ट्रण्डरस्सेलमहोदयस्य योगदानम् - https://plato.stanford.edu/entries/russell/#RWL

४) वह्राडपाण्डेमहाभागस्य परिचयात्मकः लेखः - https://maharashtratimes.com/editorial/manasa/n-r-warhadpande/articleshow/48718947.cms

५) कालः - https://www.britannica.com/science/time

६) दिग् - https://www.britannica.com/science/space-physics-and-metaphysics

७) पाश्चात्यदर्शनानुसारं गतिः - https://www.britannica.com/biography/Aristotle/Physics-and-metaphysics

पूर्वसंशोधनस्रोतसां सन्दर्भसूची –

१) कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य ग्रन्थालयः।

२) भारतीयसांस्कृतिकग्रन्थालयः।

३) अन्तर्जालीयस्रोतांसि –

- www.shodhganga.ac.in
- www.shodhgangotri.ac.in

अनुमतिपत्रम् –

“श्रीवह्लाडपाण्डेमहाभागानां दार्शनिककार्यस्य विश्लेषणात्मकम् अध्ययनम्” इति संशोधनकार्यं दर्शनशास्त्रे नविनतत्त्वान्वेषणाय एवं नूतनविचारशैल्याः विकासाय महदुपकाराय वर्तते। इदृशमनुसन्धानम् इतः पूर्वं न केनाऽपि कृतमतः प्रा. डॉ. पेन्नामधुसूदनमहोदयानां मार्गदर्शने क्रियमाणस्य अस्य संशोधनकार्यस्य कृते अनुमतिं प्रदाय अनुगृह्णन्तु इति प्रार्थ्यते।

मार्गदर्शकाः	शोधकर्ता
प्रा. डॉ. पेन्नामधुसूदनः	परीक्षित् नन्दकिशोरः झोडेकरः
अधिष्ठाता, भारतीयधर्मसंस्कृतिसंकायः	